# ANNUAL EXAMINATION, 2021-22

- Please check that this question paper contains 0**7** printed pages.
- Please check that this question paper contains 19 questions.
- Please write down the serial Number of the question before attempting it.

**CLASS-VIII**
**SUB: LOWER SANSKRIT**

**TIME- 3HOURS** **F.M-80**

## अ–भागः (बहुविकल्पात्मकाः प्रश्नाः)
## अनुप्रयुक्तव्याकरणम् (25अङ्काः)

1. **अधोदत्तपदयोः वर्णविन्यासं संयोगं वा विकल्पेभ्यः चित्वा लिखत-** (1 x 2=2)

**(i) प्रमुखः**

**(क)**प्र+मु+**खः** **(ख)**प् +र् +अ+म्+उ+ख् +अः **(ग)** प्+अ+र्+**मु**+ख् +अः

**(ii) स्+अ+र्+व्+अ+त्+र्+अ**

**(क)**सर्वत्र **(ख)**सव्रत्र **(ग)** सर्वर्त

2. **अधोदत्तवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा विकल्पेभ्यः चित्वा लिखत-** **(1 x 4=4)**

**(i)** <u>सदैव</u> सत्यं वदेत्।

**(क)**सदा +एव **(ख)**सद + एव **(ग)** सदै+व

**(ii)** <u>विद्या + अर्थी</u> सुखं त्यजेत् ।

**(क)**विदार्थी **(ख)**विद्यार्थी **(ग)**विद्यारथी

**(iii** विद्यालये <u>वनोत्सवः</u> पालितः भवति ।

**(क)** वन+उत्सवः **(ख)** वन् + उत्सवः **(ग)** वनो +उत्सवः

**(iv)** <u>रजनी + ईशः</u> प्रचलति ।

**(क)**रजनेशः **(ख)**रजनिशः **(ग)** रजनीशः

**3.प्रदत्तविकल्पेभ्यः चित्वा उचितशब्दरूपैः रिक्तस्थानानि पूरयत -** **(1 x 4=4)**

**(i)**.................... कस्मिन् कक्षे पठसि ?

**(क)**त्वया **(ख)**त्वं **(ग)**युष्मान्

**(ii)**................. जलं शीतलं भवति।

**(क)**नदीम् **(ख)**नद्याः **(ग)**नद्यै

**(iii)** ............. मधुराणि सन्ति।

**(क)**फलानि **(ख)**फलाः **(ग)**फलाभ्याम्

**(iv)जनाः ------ दर्शनं कुर्वन्ति ।**

**(क)**मुनिः **(ख)**मुनी **(ग) मुनेः**

**4.प्रदत्तविकल्पेभ्यः चित्वा उचितधातुरूपैः रिक्तस्थानानि पूरयत - (1 x 4=4)**

**(i)** बालकः पुस्तकम् ................ ।

**(क)**अपठत् **(ख)**अपठताम् **(ग)** अपठन्

**(ii)** परीक्षा कदा ...................?

**(क)**भविष्यसि **(ख)**भविष्यति **(ग)**भविष्यन्ति

**(iii)** वयं विद्यालयं ............. ।

**(क)**गच्छामः **(ख)** गच्छन्ति **(ग)** गच्छथ

**(iv) छात्राः समये एव कार्यं**-------- **।**

**(क)**कुर्यात् **(ख) कुर्युः** **(ग)** कुर्याः

**5. प्रदत्तविकल्पेभ्यः उचित-अव्ययं चित्वा रिक्तस्थानानि पूरयत - (1 x 4=4)**

**(i) जलं -----वहति ।**

**(क)** धिक् **(ख)**नीचैः **(ग)** ह्यः

**(ii) उद्याने जनाः -----भ्रमन्ति।**

**(क)** इतस्ततः **(ख)**श्वः **(ग)**ह्यः

**(iii) अत्र बालकः पठति -----बालिका लिखति।**

**(क)** श्वः **(ख)** ह्यः **(ग)**तत्र

**(iv) मूर्खं ----।**

**(क)** श्वः **(ख)**धिक् **(ग)** उच्चैः

**6.प्रदत्तविकल्पेभ्यः चित्वा उचित-उपपदेन रिक्तस्थानानि पूरयत - (1 x 4=4)**

**(i)** मार्गम् ............. वृक्षाः सन्ति ।

**(क)**सह **(ख)**बहिः **(ग)**उभयतः

**(ii)** जलेन ................ जीवनं कष्टम् ।

**(क)**अधः **(ख)** विना **(ग)**अनन्तरम्

**(iii)** .......... नमः ।

**(क)**गणेशं **(ख)**गणेशाय **(ग)** गणेशस्य

**(iv) पर्वतस्य ----मेघाः शोभन्ते।**

**(क)**श्रेष्ठः **(ख)**विना **(ग)** उपरि

**7.अधोदत्तवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य वियुज्य वा विकल्पेभ्यः चित्वा लिखत- (1 x 3=3)**

**(i) सः यात्रिणे फलं <u>दा+ तुमुन्</u> शिष्यं प्रेषितवान् ।**

**(क)**दातुं **(ख)**दत्तुं **(ग)**दातुमु

**(ii)** मूषकः मूषकराजं <u>प्र + नम् +ल्यप्</u> अवदत्।

**(क)**प्रणम्य **(ख)**प्रनल्य **(ग)**प्रणत्य

**(iii** शिष्यः तत्र गत्वा अवदत् ।

**(क)** ग+त्वा **(ख)** गम् +क्त्वा **(ग)** गत + क्त्वा

## पठितावबोधनम्(15 अङ्काः)

**8.अधोदत्तवाक्येषु रेखाङ्कितपदानां स्थाने विकल्पेभ्यः चित्वा प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत - (1 x 5=5)**

(i) **उत्तमाः मानम् इच्छन्ति ।**

**(क)**किम् **(ख)**कः **(ग)**कस्य

**(ii)** तौ स्वनिवासम् अगच्छताम् ।

**(क)**कुत्र **(ख)** कः **(ग)** कस्य

**(iii)** शिष्याः विस्मिताः अभवन्।

**(क)** किम् **(ख)**के **(ग)**कम्

**(iv)** **भवभूतिः उत्तररामचरितम् अरचयत् ।**

**(क) कः** (**ख**)**काम्** (**ग**)**किम्**

**(v)** **क्रोधः मनुष्यस्य नाशं करोति ।**

**(क) कानि** (**ख**) कम् (**ग**) कस्य

**9.अधोलिखितवाक्येषु रेखाङ्कितपदानां पर्यायपदं विकल्पेभ्यः चित्वा लिखत- (1 x 5=5)**

**(i)** सिञ्चति वाचि सत्यम्।

**(क)**शब्दः **(ख)**सज्जनाः **(ग)**वाण्यां

**(ii)**वाल्मीकिः रामायणस्य प्रणेता ।

**(क)**रचयिता **(ख)**आचार्यः **(ग)**प्रथमः

**(iii)** मनुष्यरूपेण मृगाः चरन्ति।

**(क) पक्षिणः** **(ख)**पशवः **(ग) मेघाः**

**(iv)सन्तः सन्मित्रलक्षणं प्रवदन्ति ।**

**(क) सज्जनाः (ख) दुर्जनाः (ग) बालकाः**

**(v)** **वारिवाहाः परोपकारं कुर्वन्ति ।**

**(क) पशवः (ख) मेघाः (ग) पक्षिणः**

**10.प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा यथानिर्देशं लिखत- (1 x 5=5)**

**(i)** सर्वे छात्राः कक्षायां परस्परं चर्चायां मग्नाः सन्ति - अत्र क्रियापदं किम् अस्ति ?

**(क)**चर्चायाम् **(ख)**सर्वे **(ग)** सन्ति

**(ii)**मूषकसमूहस्य राजा हृष्टः -पुष्टः आसीत् -अस्मिन् वाक्ये विशेष्यपदं किम् अस्ति ?

**(क)**हृष्टः **(ख)**राजा **(ग)**पुष्टः

**(iii)**' वयः ' इत्यस्य किं पर्यायपदम् अत्र प्रदत्तम् ?

**(क)**आयुः **(ख)**समयः **(ग)**यानम्

**(iv)संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति -** अस्मिन् वाक्ये विशेषणपदं किम् अस्ति ?

**(क) संस्कृतभाषा (ख) प्राचीनतमा (ग) भाषा**

**(v) तत् श्रुत्वा खिन्ना चटका गच्छति-** अत्र कर्तापदं किम् अस्ति ?

**(क) खिन्ना (ख) चटका (ग) तत्**

## आ- भागः(वर्णनात्मकाः प्रश्नाः)

## (अपठितावबोधनम्(10 अङ्काः)

**11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत । (10)**

अधुना सम्पूर्णे भारतदेशे प्रदूषणम् एका गभीरा समस्या वर्तते प्रदूषणस्य त्रयः प्रकाराः सन्ति । जलप्रदूषणं, वायुप्रदूषणं ध्वनिप्रदूषणं च । अद्यत्वे जनाः भौतिकसाधनैः सम्पन्नं जीवनं जीवितुम् इच्छन्ति। एतस्य कृते ते निर्भीकाः भूत्वा प्रकृतिं प्रति अत्याचारं कुर्वन्ति । जनाः वृक्षारोपणं तु न कुर्वन्ति परन्तु वृक्षाणां छेदनम् अवश्यम् एव कुर्वन्ति । यन्त्रालयानां निर्माणं तीव्रगत्या भवति। वाहनानां सङ्ख्या अपि प्रतिदिनं वर्धते एव। यस्मात् कारणात् यन्त्रालयेभ्यः वाहनेभ्यः निर्गताः विषमिश्रितरसायनपदार्थाः धूमाः ध्वनयः च सम्पूर्णं वातावरणं प्रदूषितं कुर्वन्ति। प्रदूषण- कारणात् बालाः वृद्धाः युवानः युवतयः च रोगग्रस्ताः भूत्वा समयात् पूर्वमेव मृत्युं प्राप्नुवन्ति। वयम् एतस्याः समस्यायाः समाधानं मिलित्वा एव कुर्याम ।अस्माकं मनसि 'सर्वे भवन्तु सुखिनः' इति भावना भवेत्।

**I. एकपदेन उत्तरत- (1 x 2=2)**

(i) केषां सङ्ख्या अपि प्रतिदिनं वर्धते एव ?

(ii) अद्यत्वे जनाः कैः सम्पन्नं जीवनं जीवितुम् इच्छन्ति ?

**II. पूर्णवाक्येन उत्तरत- (2 x 2=4)**

(i) अस्माकं मनसि का भावना भवेत्?

(ii) के वातावरणं प्रदूषितं कुर्वन्ति ?

**II.निर्देशानुसारम् उत्तरत- (1 x 4=4)**

(i) ' सम्पूर्णे' इति पदस्य विशेष्यपदं किम् अस्ति ?

(क) अधुना (ख) सर्वे (ग) भारतदेशे

(ii) 'कुर्याम' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(क) जनाः (ख) वयम् (ग) अस्माकं

(iii) प्रदूषणस्य त्रयः प्रकाराः सन्ति -अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

(क) त्रयः (ख) सन्ति (ग) प्रदूषणस्य

(iv) 'असम्पन्नं' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(क) सम्पन्नं (ख) सुखिनः (ग) समस्या

## रचनात्मककार्यम्(15 अङ्काः)

**12.संस्कृतस्य महत्त्वं वर्णयन् स्वमित्रं अघोलिखितं पत्रं मञ्जूषायां प्रदत्तपदै: पूरयत-** **(1/2 x 10=5)**

**134, रोहिणी**

**दिल्लीतः**

**तिथि: -----**

**प्रिय मित्र !**

**सस्नेहं नमोनमः ।**

**अत्र (i) --------तत्रास्तु । अद्य मया तव पत्रं प्राप्तम्। (ii)------- तव रूचिं ज्ञात्वा अहं प्रसन्नः अभवम् । मित्र ! अद्य अहं (iii)-------अपि संस्कृतभाषायाः विषये अपठम्। संस्कृतभाषा विश्वस्य (iv)----**भाषा **अस्ति। अस्याः साहित्यम् अति (v)----- अस्ति। अस्याः विशालः (vi)------- अद्वितीयः अस्ति। संस्कृतभाषायाम् (vii)------- मानवजीवनोपयोगिन ग्रन्थाः अपि सन्ति। अधुना वैदेशिक -विद्वांसः अपि (viii)----- महत्त्वं स्वीकुर्वन्ति । अतः अहं कथयामि यत् त्वं मनोयोगेन संस्कृतभाषायाः(ix)-----** कुरु। **मातरं पितरं च मम (x)------- निवेदयतु ।**

**तव मित्रम्**

**रजतः**

**मञ्जूषा**

**(संस्कृतविषये, शब्दकोषः, प्राचीनतमा, कुशलं, विशालम्, अध्ययनं, प्रणामान्, संस्कृतस्य, विज्ञानसम्बन्धिनः, स्वपुस्तके)**

**13.अधोदत्तं चित्रं दृष्ट्वा मञ्जूषासहायतया पञ्चवाक्यानि लिखत -** **(1 x 5=5)**



**मञ्जूषा**

| |
|---|
| नदी, जनाः, तरन्ति वार्तालापम्, क्रीडतः, नदीतीरे, वृक्ष,वृक्षस्य, व्यायामम् शीतलम् जलम्, अध, नद्याम् |

**14.अधोलिखितवाक्यानां संस्कृतेन अनुवादं कुरुत -** **(1 x 5=5)**

(i) **बालिका पुस्तक पढ़ रही है।**

The girl is reading book.

(ii) **मैं घर जाऊँगा ।**

I will go home.

(iii) **उसने कल चलच्चित्र देखा ।**

He saw film yesterday.

(iv) **तुम सबको कार्य करना चाहिए ।**

You all must do work .

(v)**हाथी वन में रहता है ।**

Elephant lives in forest**.**

## पठितावबोधनम् (15अङ्काः)

**15.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **(3)**

एकदा एकस्मिन् वने एकः शृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म । तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति । तस्य मूषकसमूहस्य राजा हृष्टः- पुष्टः आसीत् । शृगालः मूषकसमूहम् अनुसरति । तान् मूषकान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति ।

**I.एकपदेन उत्तरत -** **(½x 2 =1)**

**(i)** मूषकसमूहस्य राजा कीदृशः आसीत्?

**(ii)** कः मूषकसमूहम् अनुसरति ?

**II.पूर्णवाक्येन उत्तरत -** **(1 x 2=2)**

**(i)** शृगालः किमर्थम् इतस्ततः भ्रमति स्म?

**(ii)** मूषकान् खादितुम् इच्छन् शृगालः किं करोति ?

**16.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **(3)**

**वाणी रसवती यस्य ,यस्य श्रमवती क्रिया ।**
**लक्ष्मीः दानवती यस्य ,सफलं तस्य जीवितम् ।।**

**I.एकपदेन उत्तरत-** **(½x 2 =1)**

(i) **क्रिया कीदृशी भवेत्** ?

(ii) **का रसवती भवेत्**?

**II.पूर्णवाक्येन उत्तरत -** **(1 x 2=2)**

(i) **लक्ष्मीः कीदृशी भवेत्**?

(ii) **किं सफलं भवति** ?

**17. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (3)**

**आचार्यः –** (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति ?

**सर्वे –**(मिलित्वा)आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

**आचार्यः –**अतीव शोभनम्।अवश्यमेव कथयिष्यामि।प्रारम्भे अहं कथयिष्यामि । मध्ये मध्ये भवन्तः पृच्छन्तु । (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम् । किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता ?

**I.एकपदेन उत्तरत - (½ x 2 =1)**

**(i)'**अतीव शोभनम्' इति कः वदति ?

**(ii)**कदा अहं कथयिष्यामि ?

**II.पूर्णवाक्येन उत्तरत - (1 x 2=2)**

**(i)**आचार्यः सर्वान् दृष्ट्वा किम् अवदत् ?

**(ii)**सर्वे मिलित्वा किं अवदन् ?

**18. मञ्जूषासहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - (½x 4 =2)**

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः ।**

**उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥**

**अन्वयः– अधमाः**(i) _______ **इच्छन्ति ।** (ii) _______**धनं मानं च (इच्छन्ति)।**

**उत्तमाः** (iii) ______ **इच्छन्ति ।** (iV) ______ **हि महतां धनम् ।**

**मञ्जूषा- (मानं, धनं , मानः , मध्यमाः)**

**19. अधोलिखितवाक्यानि घटनाक्रमानुसारं लिखत- (½x 8 =4)**

(i) ग्रीष्मकाले चटकायाः तृणैः निर्मितं गृहं नष्टम् अभवत् ।
(ii) उदारहृदया चटका काकस्य साहाय्यं करोति येन काकः लज्जितः अभवत् ।
(iii) वर्षाकाले काकस्य मृत्तिकायाः गृहं नष्टम् अभवत् ।
(iv) काकः चटका च द्वे मित्रे आस्ताम् ।
(v) अभिमानी काकः चटकायै स्वगृहे शरणं न अयच्छत् ।
(vi) काकः नवीनगृहस्य निर्माणं करोति ।
(vii) सहसा अतिवृष्टिः अभवत् ।
(viii) उभौ मिलित्वा सुखेन वसतः ।

*****************